हेमचन्द्रः ॥ (भारतवर्षं यथा, विष्णुपुराणे २।३।१-२।
"उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।
वर्षं तद् भारतं नाम भारती यत्र सन्ततिः ॥
नवयोजनसाहस्रो विस्तारोऽस्य महामुने ! ।
कर्म्मभूमिरियं स्वर्गमपवर्गञ्च गच्छताम्" ॥
तथा च रामायणे २ । १०९ । २८ । हेमा ।
"कर्म्मभूमिमिमां प्राप्य कर्त्तव्यं कर्म्म यत् शुभम्" ।)

कर्म्ममूलं, क्ली, (कर्म्म यज्ञादिक्रियाजन्यं सत्कर्म्म-हेतुकं वा मूलं यस्य । कर्म्मणो मूल मिव मूलं यस्य वा ।) कुशतृणम् । इति शब्दचन्द्रिका ॥

कर्म्मयुगं, क्ली, (क्रियाति हिनस्ति अन्योन्यं यत्र युगे-तत् कर्म्म । कृ हिंसायां + मनिन्प्रत्ययः । कर्म्म हिंसाप्रधानं युगं इति कर्म्मधारयः । कलेः हिंसा-प्रधानत्वात् तथात्वम् ।) कलियुगम् । इति त्रिकाण्ड-शेषः ॥

कर्म्मयोगः, पुं, (कर्म्मसु योगस्तत्कौशलम् ।) चित्त-शुद्धिजनकवैदिककर्म्म । यथा । निष्कामकर्म्म-यात्मज्ञानमित्युक्तं यथा ।
"अयमेव क्रियायोगो ज्ञानयोगस्य साधकः ।
कर्म्मयोगं विना ज्ञानं कस्यचिन्नैव दृश्यते ।
सोऽपि दुरितक्षयद्वारा न साक्षात्" । इति मल-मासतत्त्वम् ॥ * ॥ तदनुष्ठानस्यावश्यकत्वं यथा ।
श्रीभगवानुवाच ॥
"लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ ! ।
ज्ञानयोगेन सांख्यानां कर्म्मयोगेण योगिनाम् ॥
न कर्म्मणामनारम्भान्नैष्कर्म्म्यं पुरुषोऽश्नुते ।
न च सन्न्यसनादेव सिद्धिं समधिगच्छति ॥
न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्म्मकृत् ।
कार्य्यते ह्यवशः कर्म्म सर्व्वः प्रकृतिजैर्गुणैः ॥
कर्म्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान् विमूढ़ात्मा मिथ्याचारः स उच्यते ॥
यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्ज्जुन ! ।
कर्म्मेन्द्रियैः कर्म्मयोगमसक्तः स विशिष्यते ॥
नियतं कुरु कर्म्म त्वं कर्म्म ज्यायो ह्यकर्म्मणः ।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्म्मणः ॥
यज्ञार्थात् कर्म्मणोऽन्यत्र लोकोऽयं कर्म्मबन्धनः ।
तदर्थं कर्म्म कौन्तेय ! मुक्तसङ्गः समाचर ॥
सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥
देवान् भावयतानेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥
इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः ।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥
यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्व्वकिल्बिषैः ।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥
अन्नाद्भवन्ति भूतानि पर्ज्जन्यादन्नसम्भवः ।
यज्ञाद्भवति पर्ज्जन्यो यज्ञः कर्म्मसमुद्भवः ॥
कर्म्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् ।
तस्मात् सर्व्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥
एवं प्रवर्त्तितं चक्रं नानुवर्त्तयतीह यः ।
अघायुरिन्द्रियारामो मोघं पार्थ ! स जीवति ॥
यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च सन्तुष्टस्तस्य कार्य्यं न विद्यते ॥
नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।
न चास्य सर्व्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥
तस्मादसक्तः सततं कार्य्यं कर्म्म समाचर ।
असक्तो ह्याचरन् कर्म्मपरमाप्नोति पूरुषः ॥
कर्म्मणैव हि संसिद्धिमास्थिता जनकादयः ।
लोकसंग्रहमेवापि संपश्यन् कर्त्तुमर्हसि ॥
यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत् प्रमाणं कुरुते लोकस्तदनुवर्त्तते ॥
न मे पार्थास्ति कर्त्तव्यं त्रिषु लोकेषु किञ्चन ।
नानवाप्तमवाप्तव्यं वर्त्त एव च कर्म्मणि ॥
यदि ह्यहं न वर्त्तेयं जातु कर्म्मण्यतन्द्रितः ।
मम वर्त्मानुवर्त्तन्ते मनुष्याः पार्थ ! सर्व्वशः ॥
उत्सीदेयुरिमे लोका न कुर्य्यां कर्म्म चेदहम् ।
सङ्करस्य च कर्त्ता स्यामुपहन्यामिमाः प्रजाः ॥
सक्ताः कर्म्मण्यविद्वांसो यथा कुर्व्वन्ति भारत ।
कुर्य्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम् ॥
न बुद्धिभेदं जनयेदज्ञानां कर्म्मसङ्गिनाम् ।
योजयेत् सर्व्वकर्म्माणि विद्वान् युक्तः समाचरन् ॥
प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्व्वशः ।
अहङ्कारविमूढ़ात्मा कर्त्ताहमिति मन्यते ॥
तत्त्ववित्तु महाबाहो गुणकर्म्मविभागयोः ।
गुणा गुणेषु वर्त्तन्त इति मत्वा न सज्जते ॥
प्रकृतेर्गुणसंमूढ़ाः सज्जन्ते गुणकर्म्मसु ।
तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचालयेत् ॥
मयि सर्व्वाणि कर्म्माणि संन्यस्याध्यात्मचेतसा ।
निराशीर्निर्म्ममो भूत्वा युध्यस्व विगतज्वरः ॥
ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः ।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्म्मभिः ॥
ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ।
सर्व्वज्ञानविमूढ़ांस्तान् विद्धि नष्टानचेतसः ॥
सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥
इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥
श्रेयान् स्वधर्म्मो विगुणः परधर्म्मात् स्वनुष्ठितात् ।
स्वधर्म्मे निधनं श्रेयः परधर्म्मो भयावहः" ॥
इति श्रीभगवद्गीतायां कर्म्मयोगो नाम ३ अ-ध्यायः ॥ * ॥ अन्यत् भगवन्मन्दिरादिकरणं वह्नि-पुराणे यमानुशासननामाध्याये द्रष्टव्यम् ॥

कर्म्मरङ्गः, पुं, क्ली, (कर्म्मणे हिंसाक्रियायै तत्फल-भक्षणकारिणां रोगादिजननक्रियायै इत्यर्थः रज्यते पर्य्याप्यते । कृ हिंसायां इति धातो-र्मनिन् प्रत्ययेन निष्पन्नत्वात् ततो कर्म्मन् + रञ्ज + घञ् ।) फलवृक्षविशेषः । कामराङ्गा इति भाषा ॥ (यथा, रामायणे । ३ । १७ । ८ । गौं ।
"सोमवृक्षान् कर्म्मरङ्गान् प्रियालांश्च क्वचित् क्वचित्" ।)
तत्पर्य्यायः । शिरालः २ दन्तशठः ३ रुजाकरः ४ । इति शब्दचन्द्रिका ॥ कर्म्मारः ५ कर्म्मरकः ६ पीतफलः ७ कर्म्मरः ८ मुद्गरकः ९ मुद्गरः १० धाराफलः ११ कर्म्मारकः १२ । अस्य गुणाः । अम्लत्वम् । उष्णत्वम् । वातहारित्वम् । पित्तकारि-त्वञ्च । इति राजनिर्घण्टः ॥ तीक्ष्णत्वम् । कटुपाकि-त्वम् । अस्रपित्तकारित्वञ्च । इति राजवल्लभः ॥ तत्पक्वफलगुणाः । मधुराम्लत्वम् । बलपुष्टिरुचिप्रद-त्वञ्च । इति राजनिर्घण्टः ॥
("कर्म्मरङ्गं हिमं ग्राहि स्वाद्वम्लं कफवातहृत्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे १म भागे ॥)

कर्म्मरी, स्त्री, (कर्म्म भैषज्योपयोगक्रियां राति ददाति । रा + कः । ततो गौरादित्वात् ङीष् ।) वंशरोचना । इति राजनिर्घण्टः । (वंशरोचना-शब्देऽस्या विवृतिर्ज्ञातव्या ॥)

कर्म्मवज्रः, पुं, (कर्म्म श्रौतस्मार्त्ताद्यनुष्ठानं तत्त-च्छाखादेरध्ययनमाचरणादिकं वा वज्रं वज्र तुल्यदृढ़ं यस्य । द्विजेतरजातेः श्रौतादिकर्म्मा-श्रुतिगोचरत्वेऽयत्वादिहेतुकत्वात् वज्रवत् कठिनं प्रतिभातीति भावः ।) शूद्रः । इति महाभारतम् ॥

कर्म्मवाटी, स्त्री, (कर्म्मणां शास्त्रोक्ततिथिनिमित्ती-भूतक्रियाणां चन्द्रकलाक्रियाणां वा वाटीव । पुष्प-वाटिका यथा पुष्पादेराधारस्तद्वदित्यर्थः । ति-थीनां हि कर्म्मनिमित्ततया तथात्वम् ।) तिथिः । इति हेमचन्द्रः ॥

कर्म्मविपाकः, पुं, (कर्म्मणः अधर्म्ममूलकस्य अशुभ-फलजनकस्येति यावत् विपाकः परिणामः । इह रोगादिभोगजनकदुःखमयपरिणामः अमुत्र नर-कभोगादिजनकदुःखमयपरिणामश्च ।) अशुभकर्म्म जन्यफलस्य विपाकः । रोगादिरूपजन्मान्तरीया-शुभकर्म्मफलभोग इति यावत् । तद्विवरणं यथा,—
"नरकात् प्रतिमुक्तस्तु पापयोनिषु जायते ।
पतितात् प्रतिगृह्याथ खरयोनिं व्रजेद्बुधः ॥
नरकात् प्रतिमुक्तस्तु कृमिर्भवति पातकः ।
उपाध्यायव्यलीकन्तु कृत्वा श्वा भवति द्विजः ॥
तत्पत्नीं मनसा वाञ्छंस्तद्द्रव्यं वाप्यसंशयम् ।
गर्दभो जायते जन्तुर्म्मित्रस्यैवापमानकृत् ॥
मातापितरावाक्रम्य शारिका संप्रजायते ।
पितरौ पीड़यित्वा तु कच्छपत्वञ्च गच्छति ॥
भर्त्तुः पिण्डमुपाश्नन्तो हित्वान्यानि निषेवयेत् ।
सोऽपि मोहसमापन्नो जायते वानरो मृतः ॥
न्यासापहर्त्ता नरकात् विमुक्तो जायते कृमिः ।
असूयकश्च नरकान्मुक्तो भवति राक्षसः ॥
विश्वासहर्त्ता च नरो मीनयोनौ प्रजायते ।
यवधान्यानि हृत्वा तु जायते मूषिको मृतः ॥
परदाराभिमर्षात्तु वृको घोरोऽभिजायते ।
भ्रातृभार्य्याप्रसङ्गत्वे कोकिलो जायते नरः ॥
गुर्व्वादिभार्य्यागमनात् शूकरो जायते नरः ।
यज्ञदानविवाहानां विघ्नकर्त्ता भवेत् कृमिः ॥
देवतापितृविप्राणामदत्त्वा योऽन्नमश्नुते ।
प्रमुक्तो नरकादापि वायसः स प्रजायते ।
ज्येष्ठभ्रातरमवमान्य क्रौञ्चयोनौ प्रजायते ।
शूद्रश्च ब्राह्मणीं गत्वा कृमियोनौ प्रजायते ॥
तस्यामपत्यमुत्पाद्य काष्ठान्तःकीटको भवेत् ।
कृतघ्नः कृमिकः कीटः पतङ्गो वृश्चिकस्तथा ॥
अशस्त्रं पुरुषं हत्वा नरः संजायते खरः ।
कृमिः स्त्रीवधकर्त्ता च बालहन्ता च जायते ॥